# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – ३ | गुणा: - ७० |
| विषय: - पौरोहित्यम्। | (C.C.- ५.३.८. New & Old) | समय: -३.०० त: ६.०० |
| दिनाङ्क: - ११/१०/२०१९ | सन्दर्भग्रन्थ: -संस्कारदीपक: । | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: श्लोकयो: एकस्य व्याख्या विधेया । ०५**

(क) आधानपुंससीमन्तजातनामान्नचौलका: ।
मौञ्जी व्रतानि गोदानसमावर्तविवाहका: ।.

(ख) परिणीय सगोत्रां च समानप्रवरां तथा ।
त्यागं कृत्वा ततस्तस्यास्ततश्चान्द्रायणं चरेत् ।।

**प्रश्न: २ अधोलिखित प्रश्नयो: कस्यचिदेकस्य निबन्धं लिखत । १०**

(क) ससूत्रं विवाहसंस्कार: विवेचयत ।

(ख) सापिण्ड्यविचारप्रसङ्गे याज्ञवल्क्याद्याचार्याणां मतानि निरूपयत ।

**द्वितीयान्विति:**

**प्रश्न: ३ कस्यचित् एकस्य व्याख्या कार्या । ०५**

(क) संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते ।

(ख) सूर्यमुदीक्षयति तच्चक्षुरिति ।

**प्रश्न: ४ अधोलिखितयो: कस्यचिदेकस्य निबन्धं लिखत । १०**

(क) सीमन्तोनयनसंस्कार: ।

(ख) नामकरणसंस्कार: ।

**तृतीयान्विति:**

**प्रश्न: ५ द्वयो: एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

(क) अग्निप्रणयनं वस्त्रपरिधानं समञ्जनम् ।
गोत्रोचारो वरस्य प्राक् कन्यायाश्य ततोऽर्जणम् ।।

(ख) उपनीयगुरु: शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापपेदेनं शौचाचारांश्च शिक्षयेत् ।।

**प्रश्न: ६ एकस्य निबन्धात्मकमुत्तरं लिखत । १०**

(क) मधुपर्कप्रयोगविधिं समन्त्रकं प्रतिपादयत ।

(ख) संस्कारदीपकदृष्ट्या समावर्तनसंस्कारस्य विधिं ससूत्रं लिखत ।

**चतुर्थान्विति:**

**प्रश्न: ७ अद्यस्तनयो: एकस्य टिप्पणीं लिखत । ०५**

(क) जयाहोम: ।

(ख) सप्तैता जीवमातर: ।

**प्रश्नः ८ अद्यस्तनयोः प्रश्नयोः कस्यचिदेकस्य निबन्धं लिखत ।** **१०**

(क) चतुर्थीकर्मप्रयोगविधिः ।

(ख) विवाहसंस्कारे प्रयुक्तप्रायश्चितहोममन्त्रः ।

**संयुक्तान्वितिः**

**प्रश्नः ९ अधोलिखितेषु दशप्रश्नाः संक्षेपेण समाधेयाः ।** **१०**

(१) आचार्यहारीतानुसारं संस्कारः कति विधः ? के च ते ?

(२) सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी - इति कथनं कस्य वर्तते ?

(३) संस्कारदीपकग्रन्थानुसारेण कति पाकयज्ञाः ?

(४) त्रिषु त्रिषूत्तरादिषु - इति कथनेन कानि नक्षत्राणि गृह्यन्ते ?

(५) हृदयमालभनस्य मन्त्रः कः ?

(६) आचार्याय वरं ददाति - इत्यत्र वर-शब्दस्य कोऽर्थः ?

(७) नामकरणस्य कालः कः ?

(८) केशान्तसंस्कारस्य समयः कः ?

(९) वैश्यस्य उपनयनं कालः कः ?

(१०) पलाशः दण्डः कस्य वर्णस्य कृते भवति ?

(११) राष्ट्रभृद्धोममन्त्राः कति संख्यकाः वर्तन्ते ?

(१२) गौतममतानुसारं कति संस्काराः ?

(१३) निष्क्रमणसंस्कारस्य कालः कः ?

(१४) संस्कारदीपकस्य रचयिता कः ?

(१५) चूडाकरमसंस्कारस्य कालः कः ?

----oooo----